
Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:12(3), December: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December 2023
Publication Date:30th December 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.12.70
www.ijmer.in

# पाञ्चरात्रे अनिरुद्धसंहितायामुक्तं स्नपनवैभवम्

**G. Srikanth Reddy**
Research Scholar
Department of Agama
National Sanskrit University –Tirupati

भगवतः विष्णोः समाराधनाबोधकं शास्त्रं पाञ्चरात्रम्। शास्त्रेस्मिन् विषयविभागा- नुसारं ज्ञानयोगक्रियाचर्यापादाः प्रोक्ताः। पाञ्चरात्रं श्रुतिमूलकत्वादेकायनमिति प्रसिद्धिः। भगवान् श्रीमन्नारयणः सिध्दान्तेस्मिन् वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धरूपेण चातुर्व्युहतया विराजमानत्वाच्चतुर्व्युहसिध्दान्तशास्त्रमितिप्रसिध्दिमवाप। अत्र पाञ्चरात्रशब्दे पञ्च, रात्र इति पदद्वयं विद्यते। पञ्चेभ्यः मौञ्ज्यायनादिभ्यो भगवान् विष्णुः स्वयमुपदिष्टत्वादस्य पाञ्चरात्र-मिति उच्यते। एवमनेकसंहितासु शब्दस्यास्य बहवोऽर्थाः व्याख्याताः। प्रायशः अस्मि-न्नागमे द्विशताधिकाः संहिताः विद्यन्ते। तत्र सात्वतपौष्करजयाख्याः रत्नत्रयमिति तासां विवरणरूपाः ईश्वरपाद्मपारमेश्वरा प्रोक्ताः।पाञ्चरात्रे भगवदर्चनं स्वार्थपरार्थभेदेन विभक्तम्। आराधकेन स्वनित्यकर्मसु अवश्यानुष्ठेयत्वेन भगवन्मुखोल्लाससिध्यर्थमनन्यप्रयोजनतया क्रियमाणमर्चनं स्वार्थमिति कथ्यते।ग्रामे पट्टणे वा स्वयंव्यरूपेण देवलये पुरवासिनां सर्वेषां योगक्षेमार्थं क्रियामाणमर्चनं परार्थमिति उच्यते। विषयोऽयं वामनसंहितायां सुस्पष्ट-मभिहितम्। ज्ञानादिपादविभागत्वेन संक्षिप्ताः संहितान्तराः तद्गतविषयान् बोधयन्ति। सर्वास्वपि संहितासु अनिरुध्दसंहिता अन्यतमा विराजते। अस्यां संहितायां चातुरत्नोपासनं सुष्ठु विवृतम्। पाञ्चरात्रागमस्य दिव्यागमसज्ञात्वं अनिरुध्दसंहितायामेवमुक्तम्-

**पाञ्चरात्रं महाज्ञानं नारायणसमीरितम्।**
**पाञ्चरात्रात्परं शास्त्रं न भूतो न भविष्यति।।** इति

अस्यां संहितायां पौष्करसंहितायामुक्तप्रकारः, सात्वतसंहितोक्तप्रकारश्चोपवर्णितः इत्युक्तम्। चतुर्विंशे ऽध्याये पवित्रारोपणप्रकरणे-

**पौष्करोक्तप्रकारेण यन्त्रं विष्णुमथापि वा।**
**वासुदेवाख्य यन्त्रं वा सात्वतोक्तमथापि वा ।।** इति

अस्यामनिरुध्दसमहितायां ज्ञानयोगक्रियाचर्यादि चतुर्षु पादेषु विद्यमानविषयाः सर्वे सम्यगुपवर्णिताः। अनिरुध्दे विंशेऽध्याये अवबृथोत्सववैभवमुद्दिश्य विवृतम्। पाञ्चरात्रागमे भगवत उत्सवाः नित्यनैमित्तिककाम्यभेदेन त्रिधा निर्वाह्यन्ते। तत्रापि नित्योत्सवः विशिष्य पक्षवारमासवार्षिकभेदेन विभिन्नप्रकारकः। पाञ्चरात्रसिध्दान्ते नवदिनेषु निर्वाह्यमाणानां वार्षिकोत्सवानां महोत्सवः कथ्यन्ते। वैखानसागमे तु ब्रह्मोत्सव इति प्रसिद्धिः। वैष्णवालये स्वयंभूभगवतः अवतारदिनमुपलक्ष्य तद्गतनक्षत्रानुसारं महोत्सवाः निर्वहन्ति। प्रतिदिन-मुत्सवबेराणां कृते विशिषरुपेण तीर्थोत्सवः कुर्वन्ति। यथा-

**एकं त्रयं तथा पञ्च नवकं द्वादशं तथा।।**
**सप्तदशं पञ्चविंशत् षट्त्रिंशच्च नवोत्तरम्।**
**चत्वारिंशद्विशेषेण अशीत्येकांशकं क्रमात्।।**[1] इति

अहरहं मन्दिरे तीर्थस्नानदिनात्पूर्वं रात्रौ तीर्थधिवासनमचरेत्। स्नपनमण्डपे विशेषरूपेणा -लंकृत्य स्नपनमूर्तिं उत्सवेन समानीय वेदिकायां ध्यानपीठे समारोपयेत्। ध्यानपीठपरितः पुनः सर्वविधोपचारसम्भरान् प्रकल्प्य देशिकः यजमानेन सह ऋत्विजैः वेदपारगैस्सह च स्नपनविधिपूर्वकमङ्कुरारोपणं यथाशास्त्रं समाचरेत्। सर्वविधपाद्योपचारा-दिभिः स्नपनबिम्बं समर्च्य कुम्भमुपस्थापयेत्। मूलमन्त्रेणाष्टोत्तरशताहुतीन् हुत्वान्ते बलिं प्रदद्यात्। उलूखले रजनीचूर्णं विनिक्षिप्य मुसलमुलूखले प्रक्षल्याभ्यर्चनामाचरेत्। आचार्यः तं चूर्णं प्रतिष्ठाप्य, गणिकाभिः पुनः चूर्णं समाचरेत्। एवं त्रिवारं पञ्चवारं वा सम्यक् चूर्णितं रजनीचूर्णं पुरुष-सूक्तादीन् संपठन्नुत्सवबिम्बस्य विशेषरूपेण देशिकः कुर्यात्। अवशिष्टचूर्णेण देशिकः देवेशं प्रपूज्य गङ्गातोयेन स्नपनबिम्बं पुरुषसूक्तादिना संस्नापयेत्। सन्दर्भेऽस्मिन् देशिकः विशेषरूपेण तुलसीचन्दनपुष्पादिभिः तथा विभिन्नपुष्पैश्च तं रजनीचूर्णं सम्मिश्र्य भगवतः बिम्बस्य संलेपनमाचरेत्। तस्मात्सर्वप्रयत्नेन भक्तानां सर्वेषां च प्रतापयेत्। अतः ये भक्ताः कर्मान्ते एतज्जलं पिबन्ति ते सर्वे भगवदनुग्रहेण परां सिध्दिमाप्नुयुः।

[1] अनि.सं(19.4,5)

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:12(3), December: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December 2023
Publication Date:30th December 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.12.70
www.ijmer.in

तदनु प्रभाते विशेषरूपेण अष्टोत्तरकलशैः उत्सवबेरस्य स्नपनमाचरेत्। स्नपनात्परं पालिकासु बीजानि वप्त्वा मध्ये कुम्भमुपस्थापयेत्। मण्टपस्य चतुर्द्वारिषु द्वाराधिदेवतानां पूजां विधास्य कुम्भे सोममन्त्रेण समर्चयेत्। तदनु बीजपात्रे सोममन्त्रेण सोममावाह्य ब्रह्मविष्णुशिवात्मिकं चन्द्रं हुनेत्। बीजपात्रे अष्टविधबीजानि वापयेयुः। तिलमुद्गयवमाष-सर्षपशालिनिष्पावप्रियङ्गवाः अष्टवीजानीति कथ्यन्ते। बीजान्यापूर्य, बीजपात्रस्याधिदेवानां तत्तन्मन्त्रैः समावाह्य चतुस्स्थानार्चनं कुर्यात्। पञ्चगव्यं प्राश्य विष्णुपादोदकेन पुण्याहं वाचयित्वा कौतुकं बन्धयेत्। ततः नारायणवासुदेवमण्डलद्वयं विष्णुगायत्र्या तन्त्रन्तारशोभेन
द्विव्यमन्त्रोपेतं कारयेत्। तदुक्तम्-**गन्धपुष्पफलं चैव पत्रं धान्यं तथैव च।**
**पञ्चगव्यमथोवापि नवके वक्ष्यतेऽधुना।।**
**घृतादिकमथो वापि नवरत्नोदकं तु वा।**
**नवगन्धादिकं वापि द्वादशे वक्ष्यतेऽधुना।।**[2] इति

तत्वन्यासपूर्वकेन मातृकन्यासं विधाय नेत्रबन्धं समाचरेत्।मूलमन्त्राक्षरैः न्यस्य माया सूत्रं बध्वान्ते बलिं प्रदाय मूलमन्त्र वासुदेवमन्त्राभ्यां समुच्चरन् रात्रिं जागरणं कुर्यात्। प्रातः मायासूत्रं छित्वा शारवेषु निक्षिप्य नेत्रबन्धमपि विसृज्य देशिकः सशिष्यं स्नापयेत्। बिम्बं सम्यगलंकृत्य मण्टपे स्वस्थाने सन्निवेषयेत्। कुम्भार्चनापुरस्सरं द्वारादिसर्वविधदिग्पालानां पूजयेत्। वासुदेवनारायणमण्डपाभ्यां भगवन्तमावाह्य शास्त्रपीठार्चनंमपि कृत्वा होमकार्यं समाचरेत्। शिष्येण समानीते शास्त्रपीठे यथोक्तविधिना उपविश्याशेषाणां संहितानामाद्यन्त -विशेषाणामुपदेशः देशिकेन कर्तव्यम्। शिष्यः सभक्तिकमाचार्यं वस्त्रहेमाङ्गुलीभिः तथा गोभूहिरण्यरत्नाद्यैः यथा वित्तानुसारतः समर्पयेत्। देशिकानुग्रहेण ब्रह्मणस्य विशेषेण च विधिरूपेण तन्त्रमन्त्रदीक्षा प्राप्तवानसीति फलमिदं वैश्यक्षत्रियशुद्रणां न विद्यते।पाञ्चरात्रोक्त -पाञ्चाराधनपध्दतिष्वन्यतमैः मन्त्रमण्डलमुद्रयागादिसम्यगुपदेशः लब्ध्वाऽचार्याग्रहोऽसीति देशिकः शिष्यमनुगृह्णियात्।

परापरभेदेन स्नपनविधिः द्विधा विभक्तः। तत्र परं उत्तममध्यमाधमभेदेन त्रिविधम्। सहस्रकलशमुत्तमं, तदर्धं मध्यमं ततोऽप्यर्धमधममिति स्पष्टः।अपरं एक-पञ्च-नव-एकदश -सप्तदशपञ्चविंशषट्त्रिंशचत्वारिंश-एकाशीति-अष्टोत्तरशतमिति त्रिधा स्नपनं विद्यते। एव-मयनयोः विषुवे पौर्णम्याम्, अमायाम्, द्वादश्याम्, श्रवणे, देवदेवस्य जन्मनक्षत्रे, विशेषा-भिषेचने, धमनारोधिकदिने, पवित्रारोहणे, पुष्पयागे फलपुष्पोत्सवयोः चतुस्स्थानार्चने अनावृष्टि संपाते दुर्भिक्षे संजाते विशेषव्याधिपीडने विशेषष्टिषु इष्टिद्रव्याणं परिपूर्णे च स्नपनविधिः समाचरेत्। विधेरकरणे यजमनः दोषकृद्भवेत्। अवबृथकर्मणि सुवर्णादि-भेदेन यथाशक्ति मृण्मयमपि वा दोषवर्जितं आढकमानं करकं विनिर्म्य तत्रापियाढकं तदर्धं तस्मादर्धं चोत्तममध्यमभेदेन च प्रकारः दृश्यते। करकद्वयं कुम्भमित्युच्यते। कुम्भद्वयमानं महाकुम्भमित्युच्यते। मानमेव मुख्यतमत्वात् मानानुसारमेवकुम्भं प्रकल्पयेत्। मृत्कुम्भस्यैव सूत्रवेष्टनं युज्यते। कुम्भस्य वस्त्रवेष्टनं कूर्चं शरावं कुभगतद्रव्याणि च सामान्यरूपेणं कल्पयेयुः। स्नपनमिदं केवलं कर्माङ्गरूपेण च द्विधाप्रोक्तं कर्माङ्गस्नपने अङ्कुरं वा कौतुकं वा न भवेत्। केवले स्नपने तु अङ्कुरं कौतुक च स्याताम्। कर्माङ्गस्नपनं सर्वविध-विशेषोत्सवेषु एवं केवलस्नपनं विषुवत्समयेषु समाचरेत्। प्रतिष्ठायां यान्यर्चानाङ्गकर्माणि भवेयुः, तथैव स्नपनेऽपि विशेष मण्डपं प्रकल्प्य तं शोभामानेन समलं कुर्यात्। केवलस्नपनावसरे चतु-स्स्थानार्चनं कुर्यात्। यजमानं इच्छानुसारं विनिर्मिते मण्डपे उदीच्यां कुम्भमण्डलयोः पङ्क्तिं कृत्वा पूर्वादिपश्चिमान्ते तथैव कुर्यात्। मण्डपमध्ये वेद्यां ससूत्रं कलशं वेष्टितं संस्थापय् मध्ये भगवन्तु बिम्बमपि संस्थापयेत्। कलशस्यानुरूपतः सूत्रवेष्टितानि नवकलशानि प्रकल्पनीयानि कोष्ठेषु कोणे व्रीहि पश्चिमे मार्गत्रयं कृत्वा दर्भैः परिस्थिर्या तण्डुलं व्रीहिश्च प्रकल्पयेत्। दैशिकः प्राङ्मुखो भुत्वा परमेष्ठीमन्त्रेण कुम्भं विन्यस्येत्। परितः अवशिष्टदिक्षु कुम्भानि पौरुषमन्त्रेण स्थापनीयानि। शोषणदाहनप्लवमादिसर्वविंधकर्माणि अर्ग्यदिभिः विशेषरूपेण संपूजयेत्। मन्त्रविद्देशिकः निवृत्तिमन्त्रेण कलशेष्वक्षतान् विकिरेत्।

[2] अनि.सं(19.39,40)

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:12(3), December: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December 2023
Publication Date:30th December 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

DOI: http://ijmer.in.doi./2023/12.12.70
www.ijmer.in

तत्रस्थान् दर्भानुपरि सर्वमन्त्रेण संस्थरेत्। परितः स्थितानि कुम्भानि विश्वात्ममन्त्रेण अधो मुखानि स्थापनीयानि सर्वेषु कुम्भेषु निर्वृत्तिमन्त्रेण अक्षतान् विक्रिरेयुः। नववासोभिः कुम्भानि आच्छाद्य रक्षोघ्नमन्त्रेण बलिं प्रदद्यात्। तत्समये कलशेषु द्रव्याधिवासनपूर्वकं सम्पाताज्येन सेचयेत्। कुम्भाधिवासने सकाले कर्मारम्भदिनात् पूर्वमेवाङ्कुराणि उत्पाद्यन्ते, तत्कर्म साफल्यमातनोति।

प्रभाते द्वारपूजाविधि पूर्वकं पुण्याहादिकर्माणि समाप्य कुम्भमण्डलबिम्बाग्निविधयः कुर्योसुः। बिम्बस्य चूर्णस्नानं विधाय कलशजलेन बिम्बं संस्नापयेत्। रजनिचूर्णेन शुद्धस्नानं सहस्रधारय पुंसूक्तेन विशेषस्नपनमपि देशिकः निर्वाह्यान्ते मङ्गलनिराजनं प्रदद्यात्। तदनु विभिन्नोपचारेषु प्रयुक्तानि आसनानि प्रकल्प्यान्ते पूर्णाहुति पूर्वकं बलिं प्रदद्यात्। स्नपन -विधौ बेरानुगुण्येन फलं प्रोक्तम्। एकबेरविधाने तत्रेव स्नपनम्, बहुबेरविधाने मूलबेरस्यैव स्नपनम्, उत्सवबेरस्याभावे कौतुकबेरस्य स्नपनम्, लेपभित्तिपटस्थे कर्मार्चाबिम्बस्नपनम्, दर्पणस्य बिम्बस्य तदभावे कूर्चेस्नपनम्, कर्माङ्गबिम्बाभावे उत्सवबिम्बे स्नपनं कुर्यादिति शास्त्रमर्यादा। स्नपनबिम्बेषु प्रयुक्तानि द्रव्याणि तेषां न्यासप्रकारश्च विशेषेणावधेयम्। प्रथमे कुम्भे घृतम्, द्वितीये पञ्चगव्यम्, गन्धपुष्पाक्षतानि तृतीये, प्रत्रपुष्पफलादीनि पञ्चमे, पुनः पञ्चगव्यम् षष्ठे, धान्यम् सप्ताष्टमयोः, पञ्चगव्यम् नवमे नवरत्नोदकमिति क्रमः पालनीयः। तथैव धात्रीफलोदकम्, लोध्रतोयं, रक्तचन्दनतोयम्, रजनीचूर्णतोयम्,ग्रन्थीफलयुतममश्वत्थ -तोयम्, त्रीयाङ्गुवारि, तृणोदकम्, मौञ्जीजलम्, सिद्धार्थयवतोयम्, रत्नवारि, औषधजल-मिति क्रमेण षोडशकुम्भेषु द्रव्याणि समीरितानि। सप्तदशकुम्भादारभ्य क्रमशः घृतेनयुत-मुष्णोदकम्, ततः रत्नवारि, फलोदकम्, लोहमार्जनगन्धतोयम्, अक्षतैर्युतयवोदकं क्रमशः कुम्भेषु पूरयेत्। तदनु अर्घ्यपाद्याचमनाद्याः उपचाराः समाचरणीयाः। प्रणामस्वागतासना -र्घ्यपाद्याचमनम्, पञ्चगव्यानां पृथगेकैकं समर्पणं दधिःपयमधुकषायादिकर्पूरनीराजन-ताम्बूलादयः अत्र विशिष्टरूपेण प्रोक्ताः। तदनु एकाशीतिकुम्भयोः मध्ये पञ्चविंशतिकुम्भेषु द्रव्यन्यासः प्रोच्यते। तत्र मध्ये नवकलशेषु तथा परितः घृतमाज्यदधिक्षीरार्घ्याचमनगन्ध- तोयपञ्चगव्यकषायवारिधात्रीफलोदकञ्चेति द्रव्याणि प्रकल्पनीयानि। षट्त्रिंशत्कलशविधाने तत्रापि नवकलशेषु परिवेष्टितकुम्भेषु च पुरोक्ता घृतादिनवद्रव्याणि, गन्धादिनवकानि एवं चन्दनकुङ्कुमकर्पुरागरूएलालवङ्गतक्कोलमुशीरंकोष्ठमितिप्रकारेण द्रव्याणि भवेयुः। एकोनपञ्च -शत्कलशक्रमे प्रधानसप्तदशकं कलशेषु द्रव्यविनिमयक्रमः सूचितः। मध्ये नवकुम्भेषु केवलक्षीरम्, अविशिष्टकुम्भेषु घृतां विदिक्षुकोणचतुष्टये दध्ना पूरयेत्। एकाशीतिघटस्नपन- विषये सप्तदिघटेषु क्रमशः धृतादिनवविधद्रव्याणि अवशिष्टकुम्भेषु परिपूर्णतया देशिकोक्त- प्रकारेण क्षीरं घृतं वा पूरयेयुः। एवं चाष्टोत्तरशतकलशस्नपनविधाने द्वात्रिंशत कलशेषु घृतं क्षीरं परितः चतुर्दिक्षु विदिक्षु गन्धपुष्पफलपत्रादिनि द्रव्याणि स्थापनीयानि। मण्डलान्तर्गत -कुम्भेषु ह्रस्वमण्डलं दीर्घस्नपनमिति द्विविधं भवेत्। दीर्घस्थम्भके नवप्रकारः विद्यन्ते। यथा चन्दनकुङ्कुमकर्पुरहीमतोयभेदेन चत्वारि द्रव्याणि भवेयुः। आग्नेयादिचतुर्दिक्षु चतुर्मध्य -कुम्भेषु शतपत्रं जातीमल्लिकादिवकुलेवि विशिष्टपत्राणि कलशेषु विन्यसेत्। प्राच्यां द्वादशकुम्भेषु दर्पणोदयसन्निभेन दाडिमालिकुचकदलीपनसादिफलद्रव्याणि स्थापयेयुः। आग्नेये द्वादशे कुम्भे कर्पूरं ह्रीबेरमुशीरहरिद्रादिद्रव्याणि विन्यसेत्। याम्ये द्वादशे मध्ये कुम्भ -चतुष्टये तुलसीबिल्वपत्रदविकाद्वयादिपत्रद्रव्याणि स्थापनीयानि। नैऋते पात्रं वारुणे चाङ्कुरं दूर्वाङ्कुरं सटाभद्राविष्णुकान्तमहीगजादिपत्राणि कल्पनीयाणि। वायव्ये शैवालकं अगरु कुंकुमा आथर्विकादिद्रव्याणि, सौम्ये पुन्नागपाटलचूतमारवकादिसुगन्धपत्राणि, ईशान्ये क्रमुक नारिकेलतालरोलक्रमुकादिपुष्पाणि अवशिष्टैकादशे पत्रपुष्पाणि देशिकाज्ञया कुम्भेषु न्यस्येयुः। अपरं एकादशं कलशस्थापनक्रमः त्रिधा विभक्तः एकं मध्यमे द्वितीयं पूर्वे तृतीयं पश्चिमे चतुर्थं याम्ये पञ्चमं द्विचतुष्के नवकं दिगाष्टके च कुम्भानां न्यास क्रमः प्रोक्तः। सप्तदशक्रमे मध्यमे नवकं बहिः अष्टदिक्षु कुम्भाष्टकं न्यसेत्। पञ्चविंशति घटक्रमे मध्यमे नवकं बहिः दिगाष्टकरूपेण षोडशकुम्भानि एवं षट्त्रिंशत्कलशक्रमे चतुर्दिक्षु चतुष्टयं, परितः नवकोष्टेषु नवकुम्भानि, एकोनपञ्चाशत्कलशक्रमे मध्ये नवकमष्टदिक्षु पञ्चकुम्भ-स्थापनक्रमः, एकाशीतिघटक्रमे नवघटकारेण नवपङ्क्तयः दिग्भेदं विना कल्पनीयाः।अष्टोत्तर -शतक्रमे नवपङ्क्तिषु क्रमशः द्वादशकुम्भानि स्थापनीयानि। एवमन्तिमे सहस्त्रकलशक्रमे क्षेत्रमध्यदेशेष्वष्टादशघटान्नवपङ्क्तिषु प्रत्येकं नवघटान् पुनर्नवकोष्टेषु द्वितयं द्वितयं प्रकारेण तद्बहि अष्टदिक्षु

Cover Page

DOI: http://ijmer.in.doi./2023/12.12.70
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:12(3), December: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December 2023
Publication Date:30th December 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

पञ्चप्रकारेण स्नपनकुम्भानि स्थापनीयानि। द्रव्याणि प्रकल्प्य सर्वेषां कुम्भानां क्रमशः न्यासपद्धत्यार्घ्यपाद्याद्युपचारैः नीराजनान्तं समर्पयेत्। पुन अष्टोत्तरशत -कुम्भविधाने ब्रह्मादीशान्यपर्यन्तं प्रत्येकपङ्क्तौ विन्यसेत्। द्रव्यन्यासविषयेतु सहस्रकलश- स्थापनक्रमे मध्ये अष्टदशकुम्भेषु नवरत्नानि बह्ये चत्वारिंशत् घटेषु क्रमशः मौक्तिकानि, एवमष्टोत्तरशतघटक्रमे रजनीपललमुशीरव्रीहियव प्रियङ्गुवादिधातवः बहिरष्टके ह्रिबेरं परितः न्यसेत्। तद्बहि अष्टदेशेषु रजनीशृङ्गि-बेरमुशीरोत्पलत्रितयं कान्तमित्यादिद्रव्यन्यासः कुर्यात्। अष्टद्वादशकुम्भे प्रतिद्रव्यं यथाशक्ति प्रकल्पयेत्। एवमेवाश्वत्थौदुम्बरदमनकतुलसीत्यादि -विशिष्टौषधपत्राणि सर्वेषु कुम्भेषु न्यसेत्। संसिद्धानां सर्वविधकुम्भानां व्रीहिवेद्यां पूर्वोक्त -पद्धत्यां एकैककलशाराधनप्रकारेण प्रकल्प्य देशिकः यथोक्तविधिना अर्घ्यपाद्याचमनानि पञ्चगव्यानि इतराणि विशेष स्नपनद्रव्याणि स्नपनबिम्बस्य उत्सवनिर्वहणार्थं प्रकल्पयेत्। स्नपनमिदं प्रधानतया नवप्रकारैः विराजते। उत्तममध्यमाधमभेदेन मुख्यतयावान्तरभेदेन 'उत्तमोत्तम-उत्तममध्यम-उत्तमाधमस्नपनभेदेन, एवं मध्यमोत्तममध्यममध्यममध्यमाधम-स्नपनमिति, एवं अधमोत्तम-अधममध्यम -अधमाधमभेदेन प्रकीर्तितम्।

स्पनविधिविषये पाञ्चरात्रागमे प्रायशः बह्वीषु संहुतासु बहुधा विभिन्ननामभिः प्रस्तावः दृश्यते। विशिष्य विश्वामित्रसंहितायां एकोनविंशेध्याये स्नपनविषये उत्तममध्यमाधमभेदेन तेषां विवरणरूपव्याख्यानं प्रायशः अशीत्युत्तरैकशतश्लोकेषु (180) विद्यते। तद्गतांशाः

केचनात्र प्रस्तूयन्ते।

अधमोत्तमस्नपने कलशस्थापनचिते गोमयालेपनादिनि शोधिते भूभागे प्राक्पश्चिमं दक्षिणोत्तरं च प्रत्येकं चतुर्दशसूत्राणि निपात्या एकोनसप्तत्यधिकैकशतं कोष्ठानि कुर्यात्। तेषां मध्ये पदनवकं संरक्ष्य, तद्बहिः पङ्क्तिद्वयेन परितो वीथिकां कल्पयेत्। तद्बहिः पङ्क्तित्रये ऐन्द्राद्यष्टदिक्षु प्रत्येकं पदनवकं संरक्ष्य मध्यगतानि पदानि संमार्ज्य वीथीः प्रकल्पयेत्। एवं कृते मध्ये नवां, अष्टदिक्षु प्रत्येकं नवानाम् इत्येवम् एकाशीतिकलशानां स्थापने स्थानानि संभवन्ति। तेषां कलशस्पदकेष्ठानां नक्षत्रचिह्नाङ्कितानां, मध्यमनवके मध्ये घृतकलशः, परितः पूर्वाद्यैशान्यान्तं क्रमेण उष्णोदक-रत्नोदक-फलोदक-लोहोदक-मार्जनोदक-गन्धोदक -अक्षतोदकयवोदककलशाः, बहिर्नवकेषु मध्यमेषु ऐन्द्राद्यैशान्यान्तं क्रमेण पाद्यजलदध्यर्घ्य -जलक्षीराचमनजलमधुपञ्चगव्यकषायोदककलशाः इत्येवं सप्तदशसंख्याकान् द्रव्यकलशान् कल्पयेत्। शिष्टेषु चतुःषष्टिस्थानेषु पूर्वोक्तेन क्रमेण शुद्धोककलशान् स्थापयेत्। तथा चात्र एकाशीतिकलशाः संपद्यन्ते। एवमेकाशीतिलतशैः स्नपनम् अधमोत्तमस्नपनमिति कीर्त्यते। कलशास्पदकोष्ठानि षोडशाङ्गुलायतानि षोडशाङ्गुलविस्तृतानि च स्युः।


अधममध्यमस्नपने अधमोत्तमस्नपनवत्कोष्ठान्युपकल्प्य, अधमात्तमोक्तानामेकाशीति कलशानां बहिः कोणगतान् द्वात्रिंशत्परिमितान् शुद्धोदककलशान् वर्ज्याविशिष्टानां (सप्तदश -द्रव्यकलशानां द्वात्रिंशच्छुद्धोदककलशानां) स्थापनेन अधममध्यमस्नपनं संपद्यते। तथा चात्र एकोनपञ्चाशत्कलशाः स्युः। चित्रे संख्याङ्कितेषु कोष्ठेषु अधमोत्तमोक्ता द्रव्यकलशाः, शिष्टाः शुद्धकलशमितत्यवगन्तव्यम्।

अधमाधमस्पनविधाने अधमोत्तमस्नपनवत्कोष्ठानि कल्पयित्वा, अधममध्यमोक्तानाम् एकोनपञ्चाशत्कलशानां दिग्गतान् द्वात्रिंशत्संख्याकान् शुद्धोदककलशान् अपहाय केवलानां द्रव्यकलशानां सप्तपरिमितानां स्थापने अधमाधमस्नपनं स्यात्। चित्रे संख्याङ्कितेषु कोष्ठेषु अधमोत्तमोक्ता द्रव्यकलशा इत्येवमवगन्तव्यम्।

**अधमाधममित्युक्तं शुध्दोदघटवर्जितम्।**
**पाद्यार्घ्याचामकुम्भेषु कषायफलयोरपि।।**[3] **इति**

मध्यमोत्तमस्नपनविधाने अधमोत्तमवत्कोष्ठानि परिकल्प्य, कलशाश्च स्थापयित्वा, प्राच्यादिषु चतसृषु दिक्षु एकोनपञ्चाशत्कलशस्थानानि प्रत्येकं कल्पयित्वा, तेषां मध्यमेषु क्रमेण प्राच्याद्युत्तरान्तं गुडोदक-

[3] विश्व.सं(19.84)


Cover Page

DOI: http://ijmer.in.doi./2023/12.12.70
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:12(3), December: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December 2023
Publication Date:30th December 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

इक्षुरसनालिकेरोदकशान्त्युदकलशानां, शिष्टेषु शुद्धोक-कलशानां कल्पने मध्यमोत्तमं स्नपनं संपद्यते। तथा द्रव्यकलशाः एकविंशतिः शुध्दोदक कलशाः षट्पञ्चाशदधिकद्विशतम् इत्येवं सप्तसप्तत्यधिकद्विशतं कलशान् स्थापयेत् ।

**पञ्चगव्येषु यस्य स्यादलाभः स्याद् घृतेन तत्।**
**अतः परं मध्यमस्य स्नपनस्य विधिं शृणु।।**

\- - - - - - - - - - - - - - - - - -

**मध्यमोत्तममेव स्यात् स्नपनं मधुविद्विषः।**
**अतः परं प्रवक्षामि मध्यमे मध्यम विधिम्।।**[4] **इति**

मध्यममध्यमस्नपनविधाने मध्यमोत्तमोक्तानां सप्तसप्तधिकद्विशतसंख्याकानां कलशानां बहिः स्थिकानां शुध्दोदककलशानां द्वानवत्यधिक्तैकशतसंख्याकानां विनाकरणं मध्यम-मध्यमं स्नपनं भवति। तथा चात्र एकविंशतिर्द्रव्यकलशाः चतुः षष्टिः शुध्दोदककलशाः इत्येवं पञ्चविंशतिकलशाः भवन्ति।अतः-

**अतः परं प्रवक्ष्यामि मध्यमे मध्यमविधिम्।।**
**कूर्चो शुध्दोदक विहीनो यश्चतुर्द्रव्यघटाप्लवः।**[5] **इति**

मध्यमाधमस्नपनविधाने मध्यममध्यमोक्ताताां पञ्चाशीतिकलशानां शुध्दोदककलशान् चतुःषष्ठिमितान् वर्जयित्वा केवलानामेकविंशतिद्रव्यकलशानां स्थापने मध्यमाधमस्नपनं स्यात्। यथोक्तम्- **मध्यमामथमारुह्य मध्यमाधममित्युक्तं सर्वशुध्दोदवर्जितम्।।**

**द्रव्यकुम्भैस्ततः सर्वैः स्नपनं परमेष्ठिनः।**[6] **इति**

उत्तमोत्तमस्नपनविधाने मध्यमोत्तमोक्तप्रकारेण सप्तसप्तत्यधिकद्विशतं कलशान् प्रकल्प्य प्रागादिदिग्वदाग्नेयेष्वपि एकोनपञ्चशत्कलशस्थानान्युपकल्प्य, तेषां मध्येष्वगन्यादिक्रमेण मङ्गजलसर्वगन्धोदकमूलौषधिजलकलशान्शिष्टेषु शुध्दोदककलशा अष्टाचत्वारिंशदधिक- चतुःशतमित्येवं त्रिसप्तत्यधिकचतुःशतसंखेयकान् कलशान् स्थापयेत्। एतदुत्तमस्नपनम्। अत उक्तम्- **भवेयुरेव कोष्ठानि शतमेकोनसप्ततिः।**

**आयामो विसृतं चैव तेषां स्याच्छोडशाङ्गुलम्।।**

\- - - -- - - - - - - - - - - - - - - - -

**शेषाणि मार्जयेदन्यान्यष्टाशीतिपदान्यपि।**
**व्रीहिभिः प्रथमं पीठं तस्योपरि च तण्डुलैः।।**
**उत्तम स्नपनं वक्ष्ये यथावदवधारय।।**

\- -- - - - - - - - - -- - - - - - - - - - -

**एतच्च स्नपनम ब्रह्म(प्रोक्तं) ब्रह्मन्नुत्तमसंज्ञितम्।**
**पाश्चात्य शुध्दसल्लिहीनमुत्तममध्यमम्।।**[7] **इति**

उत्तममध्यमस्नपनविधाने उत्तमोत्तमोक्तानां त्रिसप्तत्यधिकचतुःशतिमतानां, शुध्दोदक -कलशानामधीकरणे उत्तममध्यमस्नपनं स्यात्। तथा चात्र द्रव्यकलशाः पञ्चविंशतिः शुध्दो -दककलशाः चतुर्विंशत्यधिकद्विशतमित्येवममेकोनपञ्चाशदधिकद्विशतं कलशान् स्थापयेत्।

---

[4] विश्व.सं(19.113-23)

[5] विश्व.सं(19.123b,124a)

[6] विश्व.सं(19.124b,125a)

[7] विश्व.सं(19.22-25 & 125b-139)

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:12(3), December: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December 2023
Publication Date:30th December 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
DOI: http://ijmer.in.doi./2023/12.12.70
www.ijmer.in

उत्तमाधमस्नपनविधाने उत्तममध्यमोक्तानामेकोनपञ्चाशदधिकद्विशतकलशानां विना करणे केवलानां पञ्चविमशतिद्रव्यकलशानां स्थापने चोत्तमाधमस्नपनं संपद्याते । तथा चोत्तमोत्तमादिस्नपनत्रये विस्तारे त्रिसप्तत्यलिकचतुश्शतं, संक्षेपे पञ्चविंशातिश्च कलशाः स्यु। यथा- **हीनं शुध्दोगकैः सर्वैरुत्तमाधमसंज्ञितम्।**

**संक्षेपकलशाश्चैव पञ्चविंशतिसंख्यकाः।।**[8] इति

उत्पातादिनिमित्तान्यदोषनिरासार्थकस्य स्नपनस्य अष्टादशप्रभेदाः विश्वामित्रसंहिता पारमेश्वरसंहिता ईश्वरसंहिता विवदते, पाद्मसंहितया संवदति च। पारमेश्वरसंहितायां स्नपनं विस्तरेण वर्ण्यते। परापरभेदेन विभक्ते स्नपने, परभेदे दशापरभेदे पक्षचतुष्कोपेतेष्ट-त्रिंशदित्येवं षट्चत्वारिंशत् भेदा उपवर्ण्यन्ते[9]।ईश्वरसंहितायां पारमेश्वरसंहितायां निर्दिश्यमाना भेदाः संगृहीताः। परभेदे दशापरभेदे, पारमेश्वर संहितोक्तानामष्टत्रिंशद्भेदानां स्थाने नवैव भेदाः इत्येवं नवदशभेदा उपदिश्यन्ते पाद्मसंहितायां तु एतत्पक्षद्वयमप्यनादृत्येव कश्चन तृतीयपक्षो निर्दिश्यते। परापरयोः प्रस्यावो नैवदृश्यते। उत्तममध्यमाधमभेदेन प्रथमत- स्त्रैविध्यं त्रिविधस्याप्यस्य पुनः प्रत्येकमुत्तमादिभेदेन त्रैविध्यम्, तथा च स्नपनं नवविध-मिति पुनः प्रत्येकमुत्तमादिभेदेन त्रैविध्यम्, तथा च स्नपनं नवविधमिति प्राधान्येन परिगण्यते। सा पन्था विश्वामित्रसंहितयामनुश्रिता। एतेनैव क्रमेण विष्वक्सेनसंहिता स्नपनभेदान् प्रस्तुता।पाद्मविश्वामित्रसंहितयोरुपदिश्यमानः स्नपनप्रकारोऽयमुपपन्नः सुस्पष्टश्च संदृश्यते। अतः- **खादिरोदुम्बरश्चैव मधूकश्च विकङ्कतम्।**

**बिम्वं पलश इत्येते कषाय द्वादश स्मृतम्।।**[10] इति

**सहस्रकलशस्नपनम्**

विश्ववामित्रसंहितायामुपवर्णमानोऽयं सहस्रकलशस्थापनप्रकारः पारमेश्वर संहितायाम्, इश्वरसंहितायां पाद्मसंहितायां वा नोपदृश्यते। तत्र हि ब्राह्मभागे एकाशीतिः, दैवतभागे चतुर्दिक्षु प्रत्येकमेकाशीतिः, विदिक्षु प्रत्येकमेकोनपञ्चाशत् इत्येवं विंशत्यधिकपञ्चशतम्, मानुषभागे षोडशसु स्थानेषु प्रत्येकं पञ्चविंशति इत्येवं चतुःशतम् आहत्य एकाधिकैक सहस्रं कलशाः स्थापनीया इत्युपदिश्यते। एतेषु दैवतभागे द्वादशाधिकपञ्चशतं, मानुषभागे चतुरशीत्यधिकद्विशतं शुद्धोदककलशाश्च स्थापनीया इत्युपदिश्यते। तथा विश्वामित्रे संभव - वेद्यासां विवादः, यतो विश्वामित्रसंहितायां देवतभागे अष्टाविंशाधिकैकशतं शुद्धोदक-कलशाः, मानुषभागे अष्टषष्ट्यधिकसप्तशतं शुद्धोदककलशाश्च स्थापनीया इति निर्दिश्यते। कलशानां स्थानव्यत्ययवत् स्नपनद्रव्याणां च स्थानव्यत्ययः (विश्वामित्रसंहितापेक्षया) पारमेश्वरादि संहितात्रये समुपदिश्यते।

एवं पञ्चरात्रे लब्धप्रतिष्ठाभिः पारमेश्वर-ईश्वर-पाद्मसंहिताभिः सहस्रकलशस्नपने विवदमानाः विशेषांशाः विश्वामित्रविष्वक्सेनसंहितायोश्च मार्गदर्शिनी भसेते। विष्वक्सेन- संहितायां सहस्रकलशस्नपनं विश्वामित्रसंहितावदुपदिश्यते। तथा च पञ्चरात्रे सहस्रकलश- स्नपने पक्षद्वयमभ्युपगन्तव्यम्। तथोक्तम्-

**वारुणे मध्यभागे तु न्यसेत् कर्पूरकर्दमम्।**
**सौम्ये तु मध्यभागे तु न्यसेदौशीरकर्दमम्।।**
**वायव्ये मध्यभागे तु न्यसेत् सर्षपतैलकम्।**
**ईशाने मध्यभागे तु न्यसेत् कर्पूरतैलकम्।।**[11] **इति।**

* * * * * * *

[8] विश्व.सं(19.140)
[9]. पार.14.28.293
[10]विष्व.सं22.167
[11] विष्व. 22.114-39

Cover Page

DOI: http://ijmer.in.doi./2023/12.12.70
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:12(3), December: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd December 2023
Publication Date:30th December 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

## उपयुक्तग्रन्थसूची

1.अनिरुध्दसंहिता सम्पादकः एस्.नरसराजभट्टाचार्यः, मेलकोठे, 2009

2.विष्वक्सेनसंहिता- सम्पादकः लक्ष्मीनरसिंहभट्टाचार्यः, KSV-Tirupati - 1972

3.विश्वामित्रसंहितायाः समीक्षात्मकममध्ययनम्, यु. शङ्करभट्ट,KSV-Tirupati1988.